हिमसंस्कृतवार्ताः

दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-3 ■ वर्ष-4 ■ अङ्क-108 | 1 | फरवरी 16, 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ शिशिर-ऋतुः
सूर्यः उत्तरायणः फाल्गुणः कृष्ण चतुर्थी
तिथिः फाल्गुणः 5 प्रविष्ठांशः मङ्गलमयः भवेत्

2 चिकित्सकेभ्यः अध्ययनावकाशे पूर्णं वेतनम्, अभियांत्रिकी-महाविद्यालयेषु नूतनाः पाठ्यक्रमा

3 'भाग्योदयेन बहुजन्म समर्जितेन सत्सङ्गमं च लभते पुरुषो यदा वै। अज्ञानहेतु-कृतमोह-मदान्धकार-नाशं विधाय हि तदोदयते विवेकः।।'

3 अखिलभारतीय- रूपकमहोत्सवे सर्वश्रेष्ठनायिकापुरस्कारेण सम्मानिता वन्दना

## सुभाषितम्

**स्वर्गस्थितानामिह जीवलोके,**
**चत्वारि चिह्नानि वसन्ति देहे।**
**दानप्रसङ्गो मधुरा च वाणी,**
**देवाऽर्चनं ब्राह्मणतर्पणं च॥**

हिन्द्यर्थः- दानशीलता, मृदुवाणी, ईश-पूजा और विद्वान् भक्ति जिस मनुष्य में इन चार गुणों का समावेश होता है, वस्तुतः उसी का मूल्यांकन महापुरुषों की श्रेणी में किया जाता है।

# केन्द्रप्रशासनं कृत्रिमबुद्धिमत्ताम् उच्चशिक्षायां सम्मिलितुं पदक्षेपम् उत्थापयति-राष्ट्रपतिः

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः प्रावोचत् यत् केन्द्रप्रशासनं कृत्रिमबुद्धिमत्ताम् उच्चशिक्षायां सम्मिलितुं पदक्षेपम् उत्थापयति। रांची नगरस्य मेसरा इत्यत्र बिरला-इन्स्टीट्यूट ऑफ टेक्नोलॉजी इत्येतस्य सप्ततिवर्षाणां जयन्त्यवसरे कार्यक्रमं सम्बोधयन्ती राष्ट्रपतिः अवदत् यत भविष्यकाले कृत्रिमबुद्धिमत्तायाः प्रभावेन वृहत्तमं परिवर्तनम् आगमिष्यति। राष्ट्रपतिना अग्रे निगदितं यत् विकसित भारतस्य निर्माणे यूनाम् उत्साहः प्रतिबद्धता च महत्वपूर्णा भूमिकां निभालयिष्यति। अपि च एतदर्थम् अन्वेषकैः उद्यमिभिः च परम्परागत-समुदायानां ज्ञानं नैव अनवधातव्यम् । महिलानां शक्तिकरणदिशि राष्ट्रपतिः निगदितवती यत् बालिकानां विज्ञान-प्रौद्योगिकी-अभियान्त्रिक-गणित-सदृशेषु क्षेत्रेषु सहभागित्वं विद्यते।



अत्रावसरे राज्यपालः सन्तोषकुमार-गङ्गवारः अपि कार्यक्रमम् एवं सम्बोधितवान्। असौ अकथयत् यत् नवीने भारते शिक्षाक्षेत्रे वालिकानां प्रदर्शनं बालकेभ्यः विशिष्टम् अद्भुतं चास्ति।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्र प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

## तमिलनाडु-काशीनगरयोः च मध्ये सांस्कृतिकं बौद्धिकं काशी-तमिल-सङ्गमस्य तृतीयं संस्करणम् उत्तरप्रदेशस्य वाराणस्याम् आरभत

**हिमसंस्कृतवार्ताः,काशी**

तमिलनाडु-काशीनगरयोः च मध्ये सांस्कृतिकं बौद्धिकं च सम्बन्धं प्रवर्धमानं काशी-तमिल-सङ्गमम् तृतीयं संस्करणम् उत्तरप्रदेशस्य वाराणस्याम् आरभत। केन्द्रीयमन्त्री धर्मेन्द्र प्रधानः डॉ एल मुरुगनः मुख्यमन्त्री योगी आदित्यनाथः च कार्यक्रमस्यास्य उद्घाटनम् अकार्षुः।

## दिल्ल्याः पूर्वमुख्यमन्त्री पुनः आरोपाणां परिवृत्ते, भविष्यति निरीक्षणम्

केन्द्रीय-सतर्कतायोगेन षष्ठ इत्यभिनामधेयकस्य फ्लैगस्टाफ-रोड भवनस्य निर्माण नवीनकरणे च अनियमिततायाः आरोपाणां निरीक्षणाय आदेशः प्रख्यापितः। आम-आदमी-पार्टीति दलस्य संयोजकः अरविन्दकेजरीवालः दिल्ल्याः मुख्यमन्त्रिरूपेण निवसन् आसीत्। आयोगेन भारतीय जनता पार्टी दलस्य वरिष्ठ नेतुः रोहिणीतः विधायकस्य विजेन्द्रगुप्ता इत्येतस्य परिवेदनायां केन्द्रीय-लोक-निर्माण विभागाय निरीक्षणार्थं आदेशः प्रदत्तः।

## प्रयागराजे कुम्भसम्मर्दम् दृष्ट्वा सार्धद्विशतोत्तर-द्विसहस्र सङ्ख्यकानां बसयानानां प्रचालनस्य योजना

**हिमसंस्कृतवार्ताः निधिः तिवारी।**

प्रयागराजे महाकुम्भे श्रद्धालूनां बृहत्मानां संख्याम् अन्वीक्ष्य उत्तरप्रदेश-परिवहन-निगमः अग्रिमेषु त्रिषु दिवसेषु सार्धद्विशतोत्तर-द्विसहस्र सङ्ख्यकानां बसयानानां प्रचालनस्य घोषणां कृतवान्। अद्य प्रायशः त्रिसप्ततिलक्षाधिक जनाः सङ्गमे पवित्रे स्नानं समाचरितवन्तः। महाकुम्भाय अद्य श्वः च बृहत्मायां सङ्ख्यायां श्रद्धालूनां आगमनस्य सम्भावना वर्तते। एतदर्थं अनेकानि अतिरिक्त-बसयानानि प्रचाल्यन्ते।

## अमरीकीयसैन्यबलं अघोषयत् समलैंगिक-जनान् सेनायां नामाङ्कनं कर्तुं न अनुमन्यते

अमरीकीयसैन्यबलं प्रबलतया अघोषयत् यत् इदानीं समलैंगिक-जनान् सेनायां नामाङ्कनं कर्तुं न अनुमन्यते, लिङ्ग-संक्रान्ति-प्रक्रिया अपि न प्रदत्ता भविष्यति इति। सामाजिक-सन्देश-पटले अमरीकीयसैन्यबलं प्राथयत् यत् 'जेण्डर डिस्फोरिया' इत्यनेन पीडिताः जनाः राष्ट्रस्य सेवायाम् इच्छुकानां कृते सम्मानेन आदरेन च व्यवहृताः भविष्यन्ति इति। लिङ्ग-समर्थन-परिचर्या अनिर्दिष्टकालं यावत् स्थगिता भविष्यति इति सेना अवोचत्। जनवरीमासे सप्त विंशति दिनाङ्के राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन हस्ताक्षरितस्य कार्यकारी आदेशस्य अनन्तरम् नीति-परिवर्तनं जातम्, यस्मिन् समलैंगिक-जनान् सशस्त्रसेनायां प्रवेशे निषेधः कृतः, तथा च त्रिंशत्दिवसेषु समलैंगिक-सेवा-सदस्यानां कृते नीतिं निर्धारयितुं पेण्टगान् इति संस्थायै निर्देशः दत्तः।

## भारत टेक्स इत्यस्य कार्यक्रमे भागं ग्रहीष्यति प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याः भारतमण्डपे पञ्चविंशत्यधिकद्विसहस्रतम-वर्षस्य भारत टेक्स इत्यस्य कार्यक्रमे भागं गृहीयात्। अवसरेऽस्मिन् सः सभां सम्बोधयिष्यति। भारत-टेक्स इति विशिष्ट वैश्विककार्यक्रमः अस्य वर्षस्य फरवरीमासस्य चतुर्दशदिनाङ्कात् आरभ्य सप्तदशदिनाङ्क यावत् भविष्यति।

## एकविंशतिशतकम् एशियायाः शतकं भवितुम् उद्यतः

हिमसंस्कृतवार्ताः- रवीन्द्रः, बेङ्गलूरु

पाश्चात्यराष्ट्रानां ५०० वर्षाणां विश्वप्रभुत्वस्य अनन्तरम् अन्ततः लोलकं पुनः परिवर्तयिष्यति। एशियायाः अर्थव्यवस्थानां, संस्कृतीनां, विचाराणां च पुनरुत्थानं नूतनस्य एशियाई शताब्दस्य प्रारम्भस्य संकेतं ददाति, न तु विजयरूपेण, अपि तु ऐतिहासिकनिरन्तरतायां पुनरुत्थानस्य रूपेण इति पूर्वकेन्द्रमन्त्री मणिशङ्करअय्यरः अवदत्। सः अलियन्स विश्वविद्यालयेन आयोजितस्य अलियन्स् साहित्यमहोत्सवस्य चतुर्थसंस्करणस्य उद्घाटनकार्यक्रमे, गुरुवासरे वदति स्म। पूर्वकूटनीतिज्ञः अवदत् यत्, "अधुना प्रश्नः उत्पद्यते यत् एशियायाम् अमेरिकनशताब्दस्य आरम्भं वयं पश्यामः वा, अथवा वयं वास्तविकस्य एशियाई शताब्दस्य द्वारे तिष्ठामः? विश्वे अद्यतनघटनानि सूचयन्ति यत् अमेरिकनसाम्राज्यं चरमपर्यन्तं गत्वा अन्तिमक्षयम् आरब्धवान् स्यात्, किन्तु एकविंशतिशतकम् एशियाईशतकं भवितुं सज्जम् अस्ति। अस्माकं कृते एशियायाः नवीनतायाः, आततिशक्तिस्य, बौद्धिकसिद्धेः च विरासतां पुनः प्राप्तुं समयः अस्ति। एशियाई शताब्दे न भविष्यं यत् आग्रतः एव निर्मातव्यम्। पुनरुत्थानं पुनर्कल्पनीयं च अतीतम् अस्ति। एतत् वैश्विकसंलग्नता न अङ्गीकुर्वति अपितु विश्वं संवादे आमन्त्रयति यत्र एशिया अग्रणीभूमिकां निर्वहति" इति पूर्वकेंद्रीयमंत्री अयोजत्।

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## परीक्षा पे चर्चा कार्यक्रमः

परीक्षा पे चर्चा इत्येतस्य परीक्षा-सम्बद्ध-कार्यक्रमस्य पञ्चमे संस्करणं छात्रान् मस्तिष्कगतचमत्कारम् अवबोधयति। कार्यक्रमस्य एकस्मिन् भागे प्रसिद्धः आध्यात्मिक नेता सद्गुरुः शिक्षणं क्रीडारूपं कर्तुं समन्वययुतं जीवन्तं च मनसः पोषणं कर्तुं च अन्तादृष्टि विनिमयीकृतवान्। परीक्षायां ध्यानं वर्धयितुम् उत्कृष्टतां च प्राप्तुं प्रबलमनस्कतायाः कृते तन्त्राणि सहभागयन्तः सद्गुरुः छात्रान् स्वबुद्धिं गतिशीलरूपेण स्थापयितुं पृष्टवान्।

## सीबीआई संस्थायाः देशस्य विविधेषु प्रदेशेषु सहसान्वेषणम्

केन्द्रीयान्वेषण-विभागः आन्तर्जालि-कापराध-प्रकरणस्य विषये दिल्ली हरियाणा-प्रदेशयोः एकादशस्थानेषु सहसान्वेषणं चकार। सहसान्वेषणे एककोटिरुप्यकाणि, एकसहस्र-विदेशीय मुद्रा समेतय स्वर्णं प्राप्तम्। सी.बी.आई इति सूचयामास यत् अभियुक्ताः सर्वकारीय-अधिकारिणां वेशेण अवैध कार्येषु संलग्नाः आसन्।

# मुख्यमंत्री सुखविन्दरसिंहसुक्खुः मार्च १७ दिनाङ्के प्रस्तोस्यति आयव्ययकम्




हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य मन्त्रिमण्डलस्य गोष्ठी शनिवासरे मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः अध्यक्षतायां राज्यसचिवालये शिमलायां सम्पन्ना। सभायां बहवः बृहत् निर्णयाः कृताः सन्ति। राज्यमन्त्रिमण्डलस्य सत्रे २०२५ तमस्य वर्षस्य मार्चमासस्य १० दिनाङ्कात् २८ मार्चपर्यन्तं हिमाचलप्रदेश- विधानसभायाः आय-व्ययकं सत्रं (बजटसत्र) कर्तुं राज्यपालाय अनुशंसितुं निर्णयः कृतः। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः १७ मार्च दिनाङ्के हिमाचलस्य आय-व्ययकम् इति (बजट) प्रस्तोष्यति। बजटसत्रे १५ सभाः भविष्यन्ति। राज्यपालस्य सम्बोधनं मार्चमासस्य १० दिनाङ्के भविष्यति। तदनन्तरं तस्य चर्चा भविष्यति। मुख्यमन्त्री १३ मार्च दिनाङ्के चर्चायाः प्रतिक्रियां दास्यति। मन्त्रिमण्डलस्य निर्णयानां विषये मन्त्रिणौ हर्षवर्धन चौहानः, अनिरुद्धसिंहः च सूचनां दत्तवन्तौ।

# इन्दौरायां स्थापिता भविष्यति शर्करा-चक्रम्, हिमाचलत् अपि च पञ्जाबतः जम्मू-कश्मीरतः च इक्षुः गृहीतः भविष्यति



हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः। राज्ये कृषितः स्वजीविकां जनयितुं बृहत्प्रयत्नाः प्रचलन्ति। पारम्परिककृषेः दूरं गत्वा राज्ये एव इक्षोः उत्पादनं वर्धयितुं शर्कराचक्रं स्थापयितुं च योजनायां कार्यं कुर्वन् अस्ति। काङ्गड़ामण्डलस्य सीमायां इन्दोराक्षेत्रे च शर्कराचक्रस्य स्थापनस्य सम्भावनाः अन्वेषिताः सन्ति। एतद् सफलं कर्तुं पञ्जाबत्, जम्मू-कश्मीरात् च इक्षुः अपि ग्रहीतुं शक्यते। ग्रामीणक्षेत्रेषु इक्षु-उत्पादनं प्रवर्धयितुं शक्यते, कृषकाणां आर्थिकदशा अपि सुदृढां कर्तुं शक्यते। अस्मिन् विषये शुक्रवासरे उपायुक्तकार्यालयसङ्कुलस्य सभागारस्य अपि महत्त्वपूर्णसमागमस्य आयोजनं कृतम्। उपायुक्तेन कृषिविभागं एसडीएम च वित्तीयप्रावधानं, इक्षुः उत्पादनार्थं भूमिः उपलब्धता, तकनीकीसंसाधनं च सहितं सर्वेषां बिन्दुनाम् अध्ययनं कृत्वा प्रतिवेदनं निर्मातुं निर्देशः दत्तः। सः अवदत् यत् इन्दौराक्षेत्रस्य परिसरेषु च इक्षु-उत्पादनार्थं जलवायुः, तापमानं च उत्तमम् अस्ति। उपायुक्तः हेमराज बैरवा इत्यनेन उक्तं यत् अद्यावधि इन्दौराक्षेत्रे ७१९ हेक्टेयर् भूमिषु इक्षोः कृषिः क्रियते, परन्तु कृषकैः इक्षुः समीपस्थेषु राज्येषु इक्षुचक्रे नेतुम् अस्ति। अत्रत्यानां अधिकांशकृषकाणां मुकेरियां शर्कराचक्रं, होशियारपुरं, पञ्जाब वा जम्मूनगरं गन्तुं भवति।

## इक्षोः उत्पादनं वर्धयिष्यते

इक्षुकृषकाणां कृते सुविधाः प्रदातुं तस्य उत्पादनं च वर्धयित्वा राज्ये शर्कराव्यापारस्य प्रवर्धनार्थं सर्वकारः प्रतिबद्धः अस्ति। अस्मिन् अवसरे शर्कराचक्रे उत्पादनविषये आभासीमाध्यमेन विशेषज्ञैः सह विस्तृतचर्चा अपि अभवत्। अस्मिन्नवसरे अतिरिक्त-उपायुक्तः विनयकुमारः, उद्योगविभागस्य, कृषिविभागस्य, उद्यानविभागस्य सहकारीविभागस्य चाधिकारिणः अपि उपस्थिता अभवन्।

# चिकित्सकेभ्यः अध्ययनावकाशे पूर्णं वेतनम्, अभियांत्रिकी- महाविद्यालयेषु नूतनाः पाठ्यक्रमा



हिमसंस्कृतवार्ताः- शिमला। मुख्यमंत्रिणः सुखविंदरसिंहसुक्खोः अध्यक्षतायां शनिवासरे हिमाचलप्रदेशस्य मन्त्रिमण्डलस्य सभा सम्पन्ना। अस्मिन् काले अनेके महत्त्वपूर्णाः निर्णयाः कृताः। सभायां शिमलामण्डलस्य नेरवायां अग्निशामकस्थानकं उद्घाटयितुं तस्मिन् विविधवर्गस्य १७ पदानि निर्माय पूरयितुं च अनुमोदनं दत्तम्। मन्त्रिमण्डलेन राजस्वविभागे तहसीलदारस्य ०९ पदस्य निर्माणं पूरणं च अनुमोदितम्। सभायां शिमलामण्डले कोटखाई पुलिस्थानकस्य अन्तर्गतं सद्यः एव उद्घाटिते बागीपुलिसचौकी इत्यत्र विभिन्नवर्गस्य षट् पदानि निर्माय पूरयितुं च अनुमोदनं दत्तम्। सभायां योजनाविभागे विभिन्नवर्गस्य त्रीणि पदानि पूरयितुं अनुमोदनं दत्तम्। कोष, लेखा, लॉटरी विभागे कोषाधिकारिणां त्रीणि पदानि पूरयितुं मन्त्रिमण्डलेन निर्णयः कृतः। सभायां सोलनमण्डलस्य बशीले नूतनं प्राथमिकस्वास्थ्यकेन्द्रम् उद्घाटयितुं, विभिन्नवर्गस्य त्रीणि पदानि निर्माय पूरयितुं च अनुमोदनं दत्तम्।

## नूतन-मण्डलीय-कार्यालयाः

सभायां काङ्गड़ायां जलविद्युत्विभागस्य नूतनविभागम् उद्घाट्य आवश्यकानि पदस्थानानि निर्माय पूरयितुं च निर्णयः कृतः। सभायां बिलासपुरजनपदस्य श्रीनयनदेवीजी विधानसभाक्षेत्रस्य जगातखानायां जलशक्तिविभागस्य नूतनविभागस्य उद्घाटनं, तस्य संचालनाय आवश्यकपदानां निर्माणं, पूरणं च निर्णयः कृतः। सभायां सोलनमण्डलस्य लोहारघाटे नूतनं उपतहसीलं उद्घाटयितुं आवश्यकपदानि निर्माय पूरयितुं च अनुमोदनं दत्तम्। सभायां शिमला-नगरस्य हिमाचलप्रदेश- शासकीय- दन्तचिकित्सा-महाविद्यालयस्य विभिन्नविभागेषु सहायकाचार्यस्य १६ स्वीकृतपदानाम् उन्नयनार्थं सहाचार्यपर्यन्तम् अनुमोदनं दत्तम्।

## अभियांत्रिकी-महाविद्यालयेषु नवीनाः पाठ्यक्रमाः

सभायां काङ्गड़ामण्डले राजीवगान्धी राजकीय-अभियांत्रिकी महाविद्यालये, नगरोटाबागवांयां विभिन्नश्रेणीनां अष्टौ पदानां निर्माणेन पूरणेन साकं बी. टेक. (कृत्रिमबुद्धिः तथा डाटाविज्ञानम्), बी. टेक. (कम्प्यूटरविज्ञानम्) च पाठ्यक्रमप्रारम्भस्य अनुमोदनं दत्तम्। सभायां शिमला जनपदस्य प्रगतिनगरे स्थितस्य अटलबिहारीवाजपेयी- शासकीय- अभियांत्रिकी एवं प्रौद्योगिकीसंस्थाने बी. टेक. (सिविल इंजीनियरिंग) पाठ्यक्रमस्य प्रारम्भेन साकं विभिन्नश्रेणीनां सप्तपदानां निर्माणस्य पूरणस्य चानुमोदनंकृतम्। मन्त्रिमण्डलेन सुन्दरनगरस्य शासकीय- पॉलिटेक्निक-महाविद्यालये कम्प्यूटर- विज्ञान-इञ्जिनीयरिङ्ग- इत्यस्य (कृत्रिम- बुद्धि- मशीन-लर्निङ्ग) नूतनस्य डिप्लोमा-पाठ्यक्रमस्य आरम्भस्य अनुमोदनं कृतम्। तत्रैव नेरचौकस्थिते श्रीलालबहादुरशास्त्री-चिकित्सामहाविद्यालये परमाणु-चिकित्साविभागस्य स्थापनायाः निर्णयः अभवत्। एतस्य अतिरिक्तम् आचार्यः, सहाचार्यः, सहायकाचार्यः, वरिष्ठनिवासीचिकित्सकः, परमाणुचिकित्साप्रौद्योगिकीविदः, विकिरणसुरक्षापदाधिकारी च इत्यादीनि पदानि निर्मातुं पूरयितुं च सभायां अनुमोदनं दत्तम्। डॉ. वाई एस परमारशासकीयचिकित्सा महाविद्यालये जिला सिरमौरे मन्त्रिमण्डलेन विकृतिविज्ञानविभागस्य अन्तर्गतं इम्यूनोहेमेटोलॉजी, रक्ताधानविभागे च सहायकाचार्यपदं पूरयितुम् अनुमोदनं कृतम्।

## एतेभ्यः पूर्णं वेतनम्

सभायां भारते विदेशे वा अध्ययनावकाशसमये एलोपैथिकवैद्येभ्यः पूर्णवेतनं प्रदातुं निर्णयः कृतः। मन्त्रिमण्डलेन राज्यस्य सर्वाणि १३५ पुलिसस्थानकानि जनसंख्या, क्षेत्रफलं, प्रमुखाः अपराधाः, यातायातः, अन्तरराज्यसीमाः, पर्यटनस्य आन्दोलनम् इत्यादीनां मापदण्डानां आधारेण षट् वर्गेषु वर्गीकृत्य निर्णयः कृतः अस्ति। पुलिसस्थानकेषु कर्मचारिणां परिनियोजनं तेषां वर्गानुसारं संशोधनं भविष्यति, येन क्षेत्रकार्यालयाः सुदृढाः भविष्यन्ति, जनसामान्यं च उत्तमसेवाः प्रदास्यन्ति।

## राज्यसीमासु फास्टटैग इति

सत्रे २०२५-२६ वित्तवर्षस्य प्रवेशकरसङ्ग्रहार्थं उद्घोष- सह-निविदाप्रक्रियायाः अनुमोदनं कृतम्, यया २०२४-२५ वित्तवर्षस्य तुलनायां ११.५६ कोटिरूप्यकाणाम् अतिरिक्तराजस्वं प्राप्तुं शक्यते। एतदतिरिक्तं राज्ये सर्वेषु प्रवेशशुल्कबाधासु FAST Tag सुविधां चरणबद्धरूपेण कार्यान्वितुं मन्त्रिमण्डलेन निर्णयः कृतः। प्रथमचरणस्य गरमोड़ा (बिलासपुरम्), परवाणु (मुख्यम्), टियारा बाईपास (सोलनम्), गोविन्दघाट (सिरमौरः), कण्डवालः (नूरपुरम्), मैहतपुरम् (ऊना), बद्दी (सोलनम्) इत्येतेषु टोल-बैरियरेषु एषा सुविधा आरब्धा भविष्यति। मन्त्रिमण्डलेन बिलासपुरमण्डलस्य सदर तहसीलस्य पुनर्गठनार्थं नम्होल उपतहसीले अष्टौ पटवारवृत्तान् समावेशयितुं निर्णयः कृतः।

# अखिलभारतीय- रूपकमहोत्सवे

## सर्वश्रेष्ठनायिकापुरस्कारेण सम्मानिता वन्दना



**हिमसंस्कृतवार्ताः ऊना।** केन्द्रीय- संस्कृत- विश्वविद्यालय- नवदेहलीद्वारा मध्यप्रदेशराजधान्यां भोपाले रवीन्द्रसभागारे 11-14 फरवरी पर्यन्तम् आयोजिते अखिलभारतीय- रूपकमहोत्सवे द्वितीये दिने डोहगीस्थस्य सनातनधर्म- आदर्शसंस्कृत महाविद्यालयस्य छात्राः विषमपरिणयम् इत्याख्यं रूपकं प्रादर्शयन्। उत्तमेन अभिनयेन सहस्राधिकप्रेक्षकाणां पुरतः प्रशंसितमभवत् विषमपरिणयरूपकम्। गुर्जरप्रदेशीयेन गजेन्द्रशंकरेण रचितम् पञ्चाङ्कसमन्वितम् रूपकमिदं प्रस्तूय समेपि महाविद्यालयस्य कुशीलवः निर्देशकाः च प्रेक्षकैः भृशमभिनन्दिताः। अस्मिन् महोत्सवे सर्वेष्वपि 15 रूपकेषु सर्वश्रेष्ठनायिका पुरस्कारेण पुरस्कृता अभवत् महाविद्यालयस्य आचार्य प्रथमवर्षस्य छात्रा वन्दना। अस्मिन् रूपके विविधपात्राणि निरूढवन्तः महाविद्यालयस्य छात्राः शुभमशर्मा, गौरवशर्मा, जतिनशर्मा, लक्ष्यशर्मा, वन्दना, वंशिका, श्रुति, कविता, पलकशर्मा, विनायकशर्मा, ज्योतिबाला, आदित्यशर्मा, दिवांशुमोदगिल, अनुराधाभाटिया, विवेकशर्मा च। संगीतसहायकौ आस्ताम्- कृष्णः ईशानगौतमश्च रूपकेऽस्मिन् महाविद्यालयस्य आचार्याः डॉ. राजिन्द्रकुमारशर्मा, डॉ. प्रीतमसिंहः, सुश्री अनीतारानी च छात्राणां मार्गदर्शनं निर्देशनं च अकुर्वन्। महाविद्यालयस्य प्राचार्यः डॉ. लालसिंहपठानियावर्यः अन्ये आचार्याः कर्मचारिणश्च उत्तमप्रस्तुत्यर्थं छात्रेभ्यः शुभकामनाः प्रायच्छन्।

# हिमाचलप्रदेशे ग्रामीणमार्गाणां निर्माणे सप्ततिशतं प्रतिशतं मार्गाः भूमिक्लेशे पतिष्यन्ति, एतौ द्वौ महत्त्वपूर्णौ विघ्नौ

**हिमसंस्कृतवार्ताः शिमला।** हिमाचलप्रदेशे प्रधानमन्त्रिणः ग्राममार्गयोजनायाः (पीएमजीएसवाई) अन्तर्गतं याः बस्तयः मार्गैः संयोजितुं सञ्चिताः सन्ति, तासां सप्ततिशतं प्रतिशतं मार्गाः भूमिक्लेशे पतिष्यन्ति। पीएमजीएसवाई-चतुर्थचरणस्य कृते एषां मापनं कृतं, किन्तु राज्यस्य लोकनिर्माणविभागस्य गणनया केवलं त्रिंशतप्रतिशतं क्षेत्रे एव भूमेः सुगमता अस्ति। विभागेन क्षेत्रीयाधिकारिभ्यः एताः सूचनाः प्राप्ताः यत् १४६० बस्तीनां मार्गैः संयोजनस्य योजना निर्मिता, किन्तु तस्य सिद्धिः केवलं तदा सम्भविता यदि जनाः भूमिं दानरूपेण दास्यन्ति, वनोद्यान-अनुमोदनं च लप्स्यन्ते। एते उभौ एव कार्यौ महदाह्वाने भवतः।

प्रधानमन्त्री ग्राममार्गयोजनान्तर्गतं हिमाचलप्रदेशे १४६० बस्तीनां मापनं कृतम्, यत्र २५० अथवा अधिका जनसंख्या अस्ति। तासु १६३ बस्तीनां कृते मार्गनिर्माणे कोऽपि विघ्नः नास्ति। ताः बस्तयः ये पूर्वे पीएमजीएसवाई-प्रथमचरणे निर्मिताः, किन्तु केवलं अस्थिरः मार्गः आसन्, तेषां उन्नयनं सम्पद्यते तथा च तेषां राजमार्गः संसिक्तः क्रियते भविष्यति। किन्तु, शेषाः १२९७ बस्तयः ये मापनाय गृहीताः, तासु बहुषु मार्गेषु भूमिसंबद्धा महती समस्या भविष्यति। एतेषां बस्तीनां मार्गेषु सप्ततिशतं प्रतिशतं भागः वनक्षेत्रे पतिष्यति तथा च त्रिंशतप्रतिशतं क्षेत्रे तादृशं भविष्यति यत्र भूमेः दानं आवश्यकं, किन्तु हिमाचलप्रदेशे प्रतिपूर्ति अनुपलब्धिः अस्ति।

अनेकस्थलेषु सेबफलवृक्षाणाम् उद्यानानि सन्ति, अन्यत्र अपि कारणेषु भूमेः प्राप्तिः कठिनं भविष्यति। केचन जनाः ऋणं स्वीकृतवन्तः, यस्मात् बैंकोत्तरप्रमाणपत्रं (एनओसी) लब्धुं कठिनं भविष्यति। विशेषतः कृषि- ऋणकार्ड- धारककृषकाणां भूमिः अपि वित्तकोषेण अनुमोदितुं न शक्यन्ते। एषा अपि महती समस्या अस्ति। विभागस्य क्षेत्रीयाधिकारिभ्यः प्राप्तानां सूचनानुसारं यद्यपि मार्गनिर्माणस्य योजनाः सम्पादिताः, तथापि भूमिसंबद्धः क्लेशः स्यात्।

राज्यलोकनिर्माणविभागस्य प्रमुखाभियन्ता नरेन्द्रपालसिंहः अपि अङ्गीकृतवान् यत् मार्गाणां मापनं सम्पूर्णं, किन्तु तानि क्रमशः निर्मीयन्ते। यत्र भूमिः उपलब्धा, तत्रैव डीपीआर निर्मीयते। मार्गाणां कृते भूमिसंबद्धा समस्या निरन्तरं वर्तते।

# संस्कृतं गौरवप्रदम्

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

### नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
### जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।

अस्यां पवित्रभारतभूमौ इदानीमपि बहुधा परमपूजनीयाः परमादरणीयाः अनेके विद्वन्महाभागाः, भागवताचार्याः, ज्योतिषाचार्याः, पुरोहित- पण्डित- महानुभावाः, भूदेवाः गुरुचरणाः विराजमानाः सन्ति। एतद्विशालं विद्वत्समूहं विचार्य शास्त्रोक्ता प्राचीना देवसभा सम्प्रत्यपि यत्र तत्र प्रवर्तते। देवसभा इत्युक्ते सत्सङ्गः, यत्र ज्ञानभक्तिचर्चादिकं सम्भवति। अतः श्रद्धालुजनैः आदरणीयाः महानुभावाः एते सर्वत्र पूज्यन्ते, विनम्रतापूर्वकं सभक्ति च प्रणम्यन्ते। तेभ्यः धन्यवादपूर्वकं स्वागतम् अभिनन्दनादिकञ्च निवेद्यते। स्वान्तःकरणे भगवत्सम्बन्धिकः परमानन्दः अनुभूयते श्रद्धालुभिः, तैश्च धन्यता गम्यते, कृतकृत्यता च अनुभूयते। सम्प्रति काले एतादृशः सत्सङ्गः दुर्लभः एव। परन्तु अधुना पाश्चात्यसंस्कृतिः एव प्रबला जातास्ति सर्वत्र। श्रीमद्भागवतमाहात्म्ये स्पष्टम् उक्तमस्ति यत्-

*'भाग्योदयेन बहुजन्म समर्जितेन सत्सङ्गमं च लभते पुरुषो यदा वै।*
*अज्ञानहेतु-कृतमोह-मदान्धकार-नाशं विधाय हि तदोदयते विवेकः।।'*

यदा मनुष्यस्य जन्मजन्मान्तरेषु सञ्चितपुण्यफलकारणतः भाग्योदयः भवति तदा सः सत्सङ्गं लभते, अन्यथा न इति श्लोकस्य आशयः। भारते ये विप्रपुरोहिताः वर्तन्ते, ते सर्वदा संस्कृतपुस्तकैः सह सम्बन्धं रक्षेयुः, यजमानगृहेषु शुद्धकर्मकाण्डं निर्वहेयुः। यतोहि अस्माकं सनातनधर्मसंस्कृतेः वाहकाः यावन्तः संस्कृतग्रन्थाः सन्ति, ते ग्रन्थाः संस्कृतेन हि लिखिताः प्राप्यन्ते। यथा वेदोपनिषदादयः, पुराणानि, रामायणादिकाव्यशास्त्राणि, कर्मकाण्डविषयभूताः श्राद्ध- अग्निस्थापनादि- कर्मकाण्डीयाः ग्रन्थाः सर्वेऽपि संस्कृतेन हि लिखिताः सन्ति। एवं स्थिते यदि वयं संस्कृतं न जानीमः, अस्मासु भाषाबोधः हि न स्यात् तर्हि वयं सम्यक्तया विधिपूर्वकं वा यज्ञपूजादिकर्म विधातुं न शक्नुमः। अतः सर्वदौ अस्माभिः ब्राह्मणैः अन्यैस्सर्वैश्च अवश्यमपि संस्कृतं ज्ञातव्यमेव। अन्यथा कर्मसु दोषः उद्भवेत्। ब्राह्मणानाम् इतरेषाञ्च मुख्यबलं हि संस्कृतम्। संस्कृतात् हि सर्वेषां भारतीयानां तेजः वर्धते। संस्कृतम् अत्यन्तं पवित्रा देवभाषा, या भाषा देवानां महर्षीणां च श्रीमुखतः निःसृता वर्तते। सा भाषा समस्तभारते जनभाषा भवेत्। भाषेयम् अत्यन्तं सुपरिष्कृता, समृद्धा, वैज्ञानिकी च वर्तते। भाषेयमेव भारतस्य, भारतीयानां च परिचयप्रदा अस्ति।तस्मात् भाषेयं न केवलं भारते हि, अपि तु समस्तविश्वे पूर्णं सम्प्रसारणं प्राप्नुयात्। एतदर्थं प्रत्येकं भारतीयजनस्य पूर्णदायित्वम् अस्ति। एवमेव संस्कृतं शास्त्रञ्च सर्वैरपि अध्येतव्यम्, सम्प्रसारणीयं च। एवञ्चेत् भारतगौरवम् इतोऽपि वर्धेत्, तथा देशोऽयं संस्कृतमयः भवेत् इत्यत्र न संशयः इति, शम्।

# ।। श्रीरामायणकथा ।।



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

उत्तरकाण्डम्!(सप्ततितमः सर्गः)रामायणमाहात्म्यम्।महर्षिणा वाल्मीकिना कृतं सोत्तरं ख्यातं रामायणं स्वयं ब्रह्मदेवोऽपि समपूजयत्। ततः संहृष्टाः सगन्धर्वाः देवाः, सिद्धाः, परमर्षयः च नित्यं दिव्यं तद् रामायणकाव्यं शृण्वन्ति। वेदसममिदं रामायणं बुधः श्राद्धेषु श्रावयेत्। रामायणाख्यानं सौभाग्यम् आयुष्यं पापनाशनं च भवति। रामायणस्य पठनेन अपुत्रः पुत्रं लभते, अधनः धनं लभते, अपिच यः रामायणस्य पादमेकं वा नित्यं पठेत् सः सर्वपापेभ्यः मुक्तः भवेत्। यः मानवः अहन्यहनि पापानि कुरुते सः यदि रामायणस्य एकमपि श्लोकं नित्यं पठेत् तर्हि सः तेभ्यः पापेभ्यः मुक्तः भवेत्। वाचकाय वस्त्रं धेनुहिरण्यकं दातव्यं यतः वाचके परितुष्टे तु सर्वदेवताः तुष्टाः स्युः। एतदायुष्यमाख्यानं रामायणं यः नरः पठेत् सपुत्रपौत्रः सः इहलोके परलोके च सुखं प्राप्नुयात्। राघवे वैकुण्ठं गते रम्या पुरी अयोध्या बहून् वर्षगणान् शून्या अभवत्। पुनः राजानम् ऋषभं प्राप्य तत्र निवासम् उपयास्यति इत्येवं महर्षिः वाल्मीकिः सोत्तरमेतद् रामायणमायुष्यं कृतवान्। ततः पितामहः ब्रह्मदेवोऽपि वाल्मीकिना कृतं तद्रामायणम् अन्वमन्यत। यः मानवः प्रयागादीनां तीर्थानां, कुरुक्षेत्रादीनां, नैमिषारण्यानां च भ्रमणं कृत्वा मानवः यत् फलं लभते तत् फलं रामायणस्य एकैकस्य अध्यायस्य श्रवणात् लभते। यः श्रद्धासमायुक्तः मानवः रामायणं शृणोति सः सर्वपापात् मुक्तः भूत्वा विष्णुलोकं गच्छति। महर्षिणा वाल्मीकिना कृतम् आदिकाव्यमिदं रामायणं यः सदा भक्त्या शृणोति सः वैष्णवीं गतिं गच्छति। सम्पदः पुत्रदाराश्च वर्धन्ते इति सत्यमेतद् विदित्वा नियतात्मभिः रामायणं श्रोतव्यम्। रामं रामानुजं सीतां भरतं भरतानुजं सुग्रीवं वायुपुत्रं हनुमन्तं पुनः पुनः अहं प्रणमामि। यत्र यत्र रघुनाथकीर्तनं भवति तत्र तत्र कृतमस्तकाञ्जलिः वाष्पवारिपरिपूर्णलोचनः अहं राक्षसान्तकं मारुतिं प्रणमामि। रामाय रामभद्राय रामचन्द्राय वेधसे।रघुनाथाय नाथाय सीतायाः पतये नमः।।मङ्गलं लेखकानाञ्च पाठकानाञ्च मङ्गलम्।श्रोतॄणां मङ्गलञ्चैव भूमौ भूपतिमङ्गलम्।।!! इति रामायणमहाकाव्यं समाप्तम्!!-प्रदीपः!